
The Asiatic Society Of Bombay
THIS MANUSCRIPT HAS BEEN ADOPTED FOR MICROFILMING BY :-
SHREE . P. H . KARANI
Date 17-10-2008

87
1989

दर्शपौर्णमासहौत्र

Dursh Poornmas Houtr

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

83
1984

अथ दर्शपौर्णमासहोत्रप्रयोगप्रारंभः संख्या २०७

श्रीगणेशायनमः॥ अथाऽश्वलायनदर्शपूर्णमासहोत्रप्रयोगोऽभ्यते॥यजमानेनर्त्विग्ध्वर्युणाहोतरेहीत्यामंत्रितोहोताऽऽहवनीयात्प्रागुदग्ग्रेशेप्राङ्मुखोवस्थायनिष्क्रम्यप्राङ्मुखोयज्ञोपवीतीभूत्वाचम्यप्रदक्षिणमावृत्याध्वर्युंसकाशादेवतादीनामानुपूर्व्यमुच्चैरुपांशुतोवयजमानस्यप्रवरनक्षत्रनामधेयानिज्ञात्वादक्षिणेपादंपुरःपुरोनिधायतीर्थेनोत्तरंवेदिश्रोणिप्रतिपद्यतेतीर्थपदेनसर्वतीर्थेनामप्रणीतोत्करयोर्मध्यदेशरप्रणीतेकर्मणाध्योत्करयोश्चात्वालवतिचात्वालोत्करयोःप्रपद्यदक्षिणपादपार्ष्णिमुत्तरवेदिश्रोण्यासमंनिधायतत्प्रपदेनवेदीस्तीर्णंबर्हिराक्रम्यसव्यंपादंबर्हिर्वेदिनिधायपाणीविरळांगुलीकृत्वातथाभूतानसंहत्यहृदयसंमितावंकसंमितौवाधारयंश्चावापृथिव्योःसधिमीक्षमाणोनियतहस्तपादादिप्राङ्मुखस्तिष्ठन्सर्वत्रविशेषानुक्तौप्राङ्मुखत्वंयज्ञोपवीतित्वंदक्षिणाग्रंचभवति॥अथाऽग्नयेसमिध्यमानायानुब्रूहीति॥नमःप्रवक्रेनमउपद्रष्टेनमोनुख्यात्रेकृदमनुवस्थानिसदमनुवस्थानिषण्मोवीरंहसस्पतुद्यौश्चपृथिवीचाहश्चरात्रिश्चापश्चौषधयश्चवाक्॥समस्थितयज्ञःसाधुछंदोसिप्रपद्येहमेवमा॥कर्तामुकशर्माणं॥भूतेभविष्यतिजातेजनिष्यमाणआभजोम्यपाद्यंवाचोअशीतिंवह॥अंगुल्यग्रेण्यवद्रुष्य॥जातवेदोरमयापश्यन्मयीतिप्रतिसंदध्यात्॥चर्ममेद्यावापृथिवीवर्मान्निवर्मसूर्योवर्ममेसंततिरश्विकाः॥नदृष्यवाचःप्रथममसीयेनासुरोऽभिदेवाअसाम॥ऊर्जादुतयज्ञियासःपंचजनाममहोत्रंजुषध्वं॥हिं३भूर्भुवःसुवरोम्प्रवोवाजाअभिद्यवोहविषेतोघृताच्या॥देवींजिगातिसुम्नयो३प्रवोवाजा०ताच्या॥देवींजिगातिसुम्नयो३प्रवोवाजा०ताच्या॥देवींजिगातिसुम्नयो३मग्नआयाहिवीतयेगृणानोहव्यदातये॥निहोतासत्सिबर्हिषो३नंत्वासमिद्भिरंगिरोघृतेनवर्धयामसि॥बृहच्छोचायविष्ठ्यो३सनःएथुःश्रवाय्यमछादेवविवासासि॥बृहद्वग्नेसुवीर्यो३मीळेन्योनमस्यस्तिरस्तमोसिदर्शतः॥समग्निरिध्यतेवृषो३वृषोअग्निःसमिध्यतेश्वेनदेववाहनः॥तंहावर्ध्यनईळितो३वृषणंत्वाचयंवृषनंवृषणःसमिधीमहि॥अग्नेदीदयंत्वंहोद३मग्निंदूतंवृणीमहेहोतारंविश्ववेदसं॥अस्ययज्ञस्यसुक्रतो३समिध्यमानोअध्वरेग्निःपावकईड्यः॥शोचिष्केशंसमीमहो३समित्वोअग्नआहुतदेवान्यक्षिस्वध्वर॥तंहिहव्यवाळसो३मानुहोत्रादुवस्यताग्निंप्रयत्यध्वरे॥वृणीध्वंहव्यवाहनो३मानुहोत्रादुव०ध्वरे॥वृणीध्वंहव्यवाहनो३मानुहोता०ध्वरेवृणीध्वंहव्यवाहनो३मग्नेमहोअसिब्राह्मणभारत

एतामुपास्यमृचिवर्णभ्येषस्यानुपूर्वोवसनादारभ्यतस्याःपुनःपाठएवप्रायश्चित्तं॥यजमानप्रवरंप्रवृत्यावसाय॥देवेत्वोमन्वित्वऋषिष्टुतोविप्रानुमदितःकविशस्तोब्रह्मसंशितोघृताहवनःप्रणीर्यज्ञानांरथीरध्वराणामृत्वोहोतानूर्णिहव्यवाट्॥इत्यृत्वावसाय॥देवतानावाहयेत्॥अग्निमग्नआ३वह॥सोममा३वह॥अग्निमा३वह॥विष्णुआ३वह॥अग्नीषोमावा३वह॥इंद्रंवैमरुधमा३वह॥देवींआज्यपांआ३वहा॥अग्निंहोत्रायावहसंमहिमानमा३वह॥आवहजातंवेदःसुयजायज॥अमावास्यायोनु॥अग्निमग्नआ३०सोममा३०॥अग्निमा३०॥विष्णुआ३०॥इंद्राग्नीआ३०॥देवींआज्यपामित्यादि॥आंवहेतिशद्वानामंतेऽवसानेआकारःपुनश्चभवति॥यथास्थितमूर्ध्वजानुरुपविश्यतेषोस्तीर्णंबर्हिर्दक्षिणेनपाणिनाउदगग्रोस्रुसव्यहस्तहृदयसंमितंधारयन्नवाअहितिर्मातास्योतदक्षिणाग्नाछेछीरिदमहमग्निनादेवेनदेवतयाब्रह्मणाऽमुकशर्मणायजमानेनर्त्विजाऋतुनासोमेनरथंतरेणसाम्नागायत्रेणछंदसाग्निष्टोमेनयज्ञेनवषट्कारेणवज्रेणयोस्मद्द्वेष्टियंचवयंद्विष्मस्तंहनामीत्युपांशूत्कांभूमौप्रादेशंकुर्यात्॥करणमंत्रस्यचसर्वमंत्रोनेकर्मारेभउपांशुत्वं॥ततआश्रावययजेदेवाश्रावयमोमनुष्येषु॥कीर्त्ययशसेब्रह्मवर्चसायेतिमंत्रमुच्चारयन्नेवाश्रावयिष्यतमध्वर्युमनुमंत्रयते॥देवसवितरेतंत्वाकृणतेग्निंहोत्रायसहपित्रावैश्वानरेणद्यावापृथिवीमोपातामग्निर्हीताहेमानुषइत्युच्चारयन्॥प्रवरणीयमानमध्वर्युमनुमंत्रयेत॥अध्वर्युसकाशान्मानुषइतिशद्वंश्रुत्वा॥उदायुषास्वायुषोदोषधीनोरसेनोत्पर्जन्यस्यधामभिरुदस्थाममृतंअनु॥उत्थायजपति॥षष्टिश्चाध्वर्योनवतिश्चपाशाअग्निंहोतारमंतराविरुताः॥सिनंतिपाकमतिधीरएतीति॥ऋतस्यपंथामन्वेतिहोतेत्यृत्वाग्नीध्रसहितमध्वर्युमभिगम्यइंद्रमन्वारभामहेहोतरंपूर्वेपुरोहितं॥येनायेनन्नमंस्वर्देवाअंगिरसोदविमत्यृत्वाकानिष्ठिकाप्रदेशस्थितेनयुगपत्स्पृशेत्॥संमागोसिसंमांप्रजयापशुभिर्मृड्ढीत्यृत्वाउमोस्थितोधिष्मसंनह्येरज्जुतृणाग्रेमुखमेवापवर्गंविमुंजीत॥सकृन्मंत्रेणद्विस्तूष्णीं॥सर्वत्रैवंकर्मणिस्तूष्णींदर्के॥होतृषदनस्थपश्चात्प्राङ्मुखस्तिष्ठन्॥अहंदेवीधिषणेदतस्तिष्ठान्यस्यसदनेसीदयोमत्याकनरः॥इतिनदभिमंत्रयते॥निरस्तःपरावसुरितिहोतृषदनादेशुष्कोपकनिष्ठिकाभ्यांतृणमादायनैर्ऋत्यांदिशिक्षिपेत्॥अपस्यष्ठा॥इदमहमर्वावसोःसदनेसीदामीत्यृत्वादक्षिणपादेनोत्तरेणोपस्थेनोपविशेत्॥देवबर्हिःस्वासस्थेत्वाध्यासधेयमितिजपति॥अभिहिषहोनःप्रतरंबर्हिषद्वेत्यृत्वाजानुशिर

साबर्हिरुपस्थ्यातेजपति॥भूपतयेनमोभुवनपतयेनमोभूतानांपतयेनमोभूतयेनमः प्राणंप्रपद्येपानंप्रपद्येव्यानंप्रपद्येवाचं
प्रपद्येचक्षुःप्रपद्येश्रोत्रंप्रपद्येमनः प्रपद्यआत्मानंप्रपद्येगायत्रीप्रपद्येत्रिष्टुभंप्रपद्येजगतीप्रपद्येनुष्टुभंप्रपद्येछंदांसिप्रपद्ये।
सूर्योनोदिवस्पातुवातोअंतरिक्षात्॥अग्निर्नःपार्थिवेभ्यः॥नमोमह्भ्योनमोअर्भकेभ्योनमोयुवभ्योनमआशिनेभ्यः॥यजा
मदेवान्यदिशक्वामममाज्यायसःशंसमारुस्रिदेवाः॥विश्वेदेवाःशास्तनमायथेहहोतावृतोमनवेयंनिषद्य॥प्रमेब्रूत
भागधेयंयथावोयनपथाहव्यमावोवहानि॥भराधिहोतानिषदायजीयानभिप्रयांसिसुधितानिहिरण्यत्॥यजामहेयज्ञि
यान्हंतदेवाईळामहाईळ्योआज्येन॥तदद्यवाचःप्रथममसीययेनासुरांअभिदेवाअवसाम॥ईर्जादउतयज्ञियासःपंचजना
ममहोत्रंजुषध्वं॥इध्मप्रहीते॥अग्निर्होतानवेत्वग्नेर्होत्रंवेत्वनुप्रावित्रंसाधुतेयजमानदेवतायोअग्नि॥अथोपांशु॥होतारमृधाः
इतिजपेत्॥घृतवतीमध्वर्योःस्रुचमास्यस्वदेवयुवंविश्ववारेईळामहेदेवाईळेन्योनमस्यामनमस्यान्याजमयज्ञियान्॥यो३
यजामहेसमिधःसमिधोअग्नआज्यस्यव्येतू३वौ३षट्॥वागोजःसहओजोमयिप्राणापानौ॥इतिप्रतिचषट्कारंअनुमंत्र
येत॥येयजामहेहेतनूनपादग्नआज्यस्यवेतू३वौ३०॥वसिष्ठादीनीतु॥येयजामहेनराशंसोअग्नआज्यस्यवेतू३वौ३०॥येयजामहेइळो
अग्नआज्यस्यव्येतू३वौ३०॥येयजामहेबर्हिरग्नआज्यस्यवेतू३वौ३०॥येयजामहेस्वाहाग्निंस्वाहासोमंस्वाहाग्निंस्वाहाविष्णुस्वा
हाग्नीषोमौस्वाहेंद्रंवेमधंस्वाहादेवाआज्यपाजुषाणाअग्नआज्यस्यव्येतू३वौ३०॥इतिपौर्णमास्यौ॥अथामावास्यांतु॥
विष्णोरनंतरंस्वाहेंद्राग्नीस्वाहादेवाआज्यपाइत्यादि॥वार्त्रघ्नापौर्णमास्यां॥अग्निर्ऋषिर्गायत्रंछंदोघनइंद्रोदेवतासुर्विपन्यया॥समि
धःशुक्रआहुतीः३०॥येयजामहेग्निंजुषाणोअग्निराज्यस्यवेतू३वौ३०॥त्वंसोमासिसत्पतिस्त्वंराजोतवृत्रहा॥त्वंभद्रोअसिक्रतो
३॥येयजामहेसोमंजुषाणःसोमआज्यस्यहविषोवेतू३वौ३०॥वृधन्वंतावमावास्यायां॥अग्निःप्रत्नेनमन्मनाशुंभानस्तनुवं
स्वा॥कविर्विप्रेणवावृधो३॥येयजामहेग्निंजुषाणोअग्निराज्यस्यवेतू३वौ३०॥सोमगीर्भिष्ट्वावयंवर्धयामोवचोविदः॥सुमृळी
कोनआविशेः३॥येयजामहेसोमंजुषाणःसोमआज्यस्यहविषोवेतू३वौ३०॥अथपौर्णमास्यां॥अग्निर्मूर्धादिवःककुत्पतिः
पृथिव्याअयं॥अपारेतांसिजिन्वतो३॥येयजामहेग्निंभुवोयज्ञस्यरजसश्चनेतायत्रानियुद्भिःसचसेशिवाभिः॥दिविमूर्धा

93
1989

नंदधिषेसरस्वतीजिह्मग्नेचरुषेहव्यवाहोंवौ३०॥इदंविष्णुर्विचक्रमेत्रेधानिदधेपदं॥समूळ्हमस्यपांसुरेस्वाहोः ऊं
उरुः॥येयजामहेविष्णुंत्रिधातुंपृथिवीमेषएतांविचक्रमेशतर्चसंमहित्वा॥प्रविष्णुरस्तुतवसःस्तवीयांत्वेषंह्यस्यस्थविरस्यनामा॥
वौ३०॥अग्नीषोमासवेदसासहूतीवनतंगिरः॥संदेवत्राबभूवथो३॥येयजामहेग्नीषोमोयुवमेतानिदिवियोचनान्यग्निश्चसो
मसक्रतूअधत्तं॥युवंसिंधूरभिशस्तेरवद्याद्ग्नीषोचमुंचतंगृभीतान्वौ३०॥विनइंद्रमृधोजहिनीचायच्छपृतन्यतः॥यो
अस्मांअभिदासत्यधरंगमयातमो३॥येयजामहेइंद्रंवेमृधंमृगोनभीमःकुचरोगिरिष्ठाःपरावतआजगंथापरस्याः॥सकृत्सेशायप
विमिंदतिंगमेविराज्रन्ताच्छिद्यविमृधोनुदस्वा३वौ३०॥पिप्रीहिदेवोउशतोयविष्णविंद्राग्नूंरुद्रांरुद्रतुपतिंयजेहा॥येदेव्याऋत्वि
जस्तेभिरग्नेत्रयोदशंहोतृणामस्मायजसिंधो३॥येयजामहेग्निंस्विष्टकृतमयाळग्निरग्नेःप्रियाधामान्ययाद्सोमस्यप्रियाधामान्यया
ळग्नेःप्रियाधान्ययाद्विष्णोःप्रियाधामान्ययाळिंद्रस्यवेमृधस्यप्रियाधामान्यया
द्देवानामाज्यपानांप्रियाधामानियक्षदग्नेर्होतुःप्रियाधामानियक्षत्स्वंमहिमानमायजतामेज्याइषःरुणोतुसोअध्वरा
जातवेदाजुषतांहविरग्नेयद्यविशोअध्वरस्यहोतःपावकशोचेवेष्टुहियज्वाकृतायजासिमहिनाविय्द्भ्यावहयवि
ष्ठयातेभयाव३वौ३०॥अमावास्यांतु॥अग्नीषोमस्थानेइंद्राग्नीदेवता॥इंद्राग्नीअवसागतमस्मभ्यंवर्षणीसह॥मानो
दुःशंसईशतो३॥येयजामहइंद्राग्नीगीर्भिर्विप्रःप्रमतिमिच्छमानईट्टेरयिंयशसंपूर्वभाजं॥इंद्राग्नीवृत्रहणासुवज्राप्र
नोनयेभिस्तिरतंदेष्णवौ३०॥पूर्वोक्तवत्॥पिप्रीहिदेवामित्यादिविष्णोरनंतरं॥इडाग्न्योःप्रियाधान्ययाद्देवानामाज्यपाना
मित्यादिवषट्कारपर्यंतं॥अध्वर्योःप्रदेशिन्याःपर्वणिउत्तमेअंजयित्वा॥वाचस्पतिनातेहुतस्योर्जंपानायप्राश्नामीति॥अ
रमधरोष्ठे॥स्रुक्खादकं॥अंजलिनेळांप्रतिगृह्यसव्येपाणोरुत्वापश्चादस्योदगंगुलिंपाणिमुपधायावांतरेळामवदायया
वांतरेणांगुष्ठमेगुलीश्चस्वयंहितीयमादहीतप्रत्यात्मामंगुष्ठेनाभिसंगृह्यप्रत्याहृत्यांगुलीरमुष्टिंकृत्वादक्षिणतइळो
पहिगृह्यास्यसंमितामुपहूयतेप्राणसंमितांवा॥इळोपहूतासहदिवाकृहतादित्येनोपास्मोइळाह्वयतोसहदिवाकृहतादि
त्येनेळोपहूतासहांतरिक्षेणवामदेव्येनवायुनोपास्मोइळाह्वयतोसहांतरिक्षेणवामदेव्येनवायुनेळोपहूतासहपृथि

व्यारथंतरेणाग्निनोपास्मांइळाहूयतांसहएथिव्यारथंतरेणाग्निना॥उपहूतागावःसहाशिरउपमोगावःसहाशिराहूयंतामुप
हूताधेनुःसहवर्षभोपमोधेनुःसहऋषभाहूयतामुपहूतागोघृतपद्यपमोगोघृतपदीहूयतांमुपहूतादिव्याःसप्तहोतारउप
मोदिव्याःसप्तहोतारोहूयंतामुपहूतःसखाभक्षउपमोसखाभक्षोहूयतामुपहूतेळावृष्टिरुपमामिळावृष्टिहूयतां॥इत्य
पांश्वथोद्वैः॥इळोपहूतोपहूतेळोपास्मांइळाहूयतामिळोपहूता॥मानवीघृतपदीमेधावरुणीब्रह्मदेवहूतमुपहूतेदै
व्याअध्वर्यवउपहूताउपहूतामनुष्याः॥यउमंयज्ञमवान्येवयज्ञपतिंवर्धानुपहूतेद्यावापृथिवीपूर्वजेऋतावरीदेवीदेव
पुत्रे॥उपहूतोयंयजमानउत्तरस्यांदेवयज्यायामुपहूतोभूयासंहविष्करणइदंमेदेवाहविर्जुषंतामितिनस्मिन्नुपहूतः॥
अवोतरेळोप्राश्नीयात्॥इळेभागंजुषस्वनःपिन्वगाजिन्वार्वतोरायःस्योषःस्येशिषेनस्योदास्वतस्योदास्तस्यास्तेभाग
मशीमहि॥सर्वीमानःसर्वतनवःसर्ववीराःसर्वपूरुषाः॥सर्वपुरुषाइतिवा॥आहवनीयंपरिस्तरणैरंजलिमेनधीयपआसे
चयतेतन्मार्जनं॥इतिमाजनलक्षणं॥कइदंकस्माअदात्कामःकामायादात्कामोदाताकामंप्रतिग्रहीताकामंसमुद्रमावि
शकामेनत्वाप्रतिगृह्णामिकामैतत्तेवृष्टिरसिद्योस्त्वादातृपृथिवीप्रतिगृह्णातुकृत्यैत्वास्वभोगेअन्वारब्धंरक्ष॥यथाभागंप्र
तिगृह्णामीतिमंत्रेणस्वभागंगृहीत्वा॥अथानुयाजाः॥देवंबर्हिर्वसुवनेवसुधेयस्यवेतू३वो३०॥देवोनराशंसोवसुवनेवसु
धेयस्यवेतू३वो३०॥देवीअग्निःस्विष्टकृत्सुहवाभिरिडःकविःसत्यमन्मायजीहोताहोतृर्हितुरायजीयानग्नेयोदेवानयाऽऽ
अपिप्रयंतेहोत्रेअमर्त्यंतांःससप्तधीहोत्रादेवेगमोदिविदेवेषुयज्ञमेरयंमस्विष्टकृद्भ्योग्नेहोताभूर्वसुवनेवसुधेयस्य
नमोवाकेवीही३वो३०॥कतीश्चासहीनेसतिअमर्त्यस्तेत्यवसानमितिअनुवानंवा॥अथसूक्तवाकायसंप्रेषितः॥इदं
द्यावापृथिवीभद्रमभूद्याधमसूक्तवाकमृतनमोवाकमृध्यासमसूक्तोच्यमग्नेत्वंसूक्तवागसि॥उपश्रुतीदिवस्पृथिव्योरोम
न्वतीतस्मिन्यज्ञेयजमानद्यावापृथिवीस्तां॥शंगयोजीरदानूअत्रस्नूअप्रवेदेउरुगव्यूतीअभयंकृतो॥वृष्टिद्यावरीत्या
पाशंभुवोमयोभुवर्ऊर्जस्वतीपयस्वतीसूपचरणाचस्वधिचरणाचतयोरावि.हीत्यवसाय॥अग्निरिदंहविरजुषतांवीवृध
तमहोज्यायोकृत॥सोमइदंहविरजुषतांवीवृधतमहोज्यायोकृत॥अग्निरिदंह०॥उपांश्व॥विष्णोः॥उच्चैः॥इदंहवि०कृत॥

अग्नीषोमाविदंहविरजुषेतांमवीवृधेतांमहोज्यायोकृतां॥इंद्रोवेमधंइदं०कृत॥देवाआज्यपाआज्यमजुषंतांवीवृधतमहोज्यायो
कृत॥अग्निर्होत्रेणेदं०हृ०कृत॥इतिपौर्णमास्यां॥दर्शेतु॥विष्णोरनंतरं॥अग्नीषोमस्थाने॥इंद्राग्नीइदंहविरजुषेतांमवीवृधेतां
महोज्यायोकृतां॥देवाआज्यपामित्यादि॥अस्यामधेधोज्यायोदेवंगमायामाशास्तेयेयजमानः॥कर्तीआहिताग्नेःअमु
कशर्मीमुकनक्षत्रोद्वारः॥आयुराशास्तेसुप्रजास्त्वमाशास्तेरायस्पोषमाशास्तेसजातवनस्यामाशास्तेऽउत्तरोदेवयज्यामा
शास्तेभूयोहविष्करणमाशास्तेदिव्यंधामाशास्तेविश्वंप्रियमाशास्तेयदनेनहविषाशास्तेनदृश्यानमध्यानदस्मेदेवारा
संतोनदग्निर्देवोदेवेभ्योवनतेवयमग्नेमीनुषाः॥इष्टंचवीतंचोभेचनोद्यावापृथिवीअंहसस्पातमेहगतिर्वीमस्येदं
नमोदेवेभ्यः॥ ॥अथशंयुवाकायसंप्रेषितः॥ ॥तछंयोराचृणीमहेगातुंयज्ञायगातुंयज्ञपतयेदैवीःस्वस्तिरस्तु
नःस्वस्तिर्मानुषेभ्यः॥ईर्ध्वंजिगातुभेषजंशंनाअस्तुद्विपदेशंचतुष्पदे॥ ॥वेदमस्मेपयश्चतिअध्वर्युस्तेगृह्णी
यात्॥वेहोमिवेहोविदेयेतिमंत्रेण॥उदायुषास्वायुषोदोषधीनोरसेनोपर्जन्यस्यधामभिरुदस्थाममृतोअनु॥
इत्यनिष्टेतृ॥ ॥जघनेनगार्हपत्यमुपविश्य॥अध्वर्युःप्रेषितःश्रुत्वा॥आप्यायस्वसमेतुतेविश्वतःसोमवृष्ण्यं॥भवा
वाजस्यसंगथे३॥येत्रयजामहेसोमंसंतेपयांसिसमुयंतुवाजाःसंवृष्ण्यान्यभिमातिषाहः॥आप्यायमानोअमृ
तायसोमदिविश्रवोस्युत्तमानिधिष्वा३वो३०॥इहत्वष्टारमग्नियेविश्वरूपमुपह्वये॥अस्माकमस्तुकेवलो३॥
ये३०॥त्वष्टारंतन्नस्तुरीपमधपोषयित्नुंदेवत्वष्टरिदंरराणःस्यस्व॥यतोवीरःकर्मण्यःसुदक्षोयुक्तग्रावाजायतेदेव
कामा३वो३०॥देवानोपत्नीरुशतीरबंतुनःप्रावंतुनस्तद्वाजसातये॥याःपार्थिवासोयाअपामपित्रेतानोदेवीः
सुहवाःशर्मयछंतो३॥ये३०हेदेवानोपत्नीरुतत्नग्नायंतुदेवपत्नीरिंद्राण्यग्नाय्यश्विनीराट्॥आरोदसीवरुणानो
भ्रूणोतुयंतुदेवीर्यऋतुर्जनीनां३वो३०॥राकामहंसुहवंसुष्टुतीहुवेश्रृणोतुनःसुभगाबोधतुत्मना॥सीव्य
त्वपःसूच्याछिद्यमानयाददातुवीरंशतदायमक्थ्यं३॥येय३यजामहेराकोयास्तेराकेसुमतयःसुपेशसोया
भिर्दासिदाशुषेवसूनि॥ताभिर्नोअद्यसुमनाउपागहिसहस्रपोषंसुभगेररांणो३वो३०॥सिनीवालिपृथुष्टुके

केयादेवानामसिसमा॥जुषस्सहव्यमाहुतंप्रजांदेविदिदिड्ढिनो३ ये ३० हेसिनीवालीयासकबाहुःस्वंगुरिःसकूपमाबहुसूवरी॥
तस्यैविश्प[illegible]त्न्येहविःसिनीवाल्यैजुहोतनः३वौ ३०॥कुहूमहंसकृतंविघ्नापसमस्मिन्यज्ञेसुहवोजोहवीमि॥सानो
ददातुश्रवणंपितृणांतस्यैतेदेविहविषाविधेमो३ ॥ये ३० हेकुहूंकुहूर्देवानाममृतस्यपत्नीहव्यानोअस्यहविषःश्रणो
तु॥सेदाशुषेकिरतुभूरिवामंरायस्पोषंयजमानेददातू३वौ ३०॥अनुनोयानुमतिर्यज्ञंदेवेषुमन्यतो॥अग्निश्चहव्य
वाहनोभवतंदाशुषेमयो३ ॥ये ३० हेनुमतिमन्विदनुमतेत्वंमन्यासैशंवनरुधि॥ऋतेदक्षायनोहिनुप्रणआयू
विनारिषा३ द्वौ ३०॥अग्निर्होतागृहपतिःसराजाविश्वावेदज्जनिमाजातवेदाः॥देवानामृतयोमर्त्यानोयज्ञिष्ठःसप्र
यजतामृतावौ३ ॥ये ३० हेग्निंगृहपतिंहव्यवाळग्निरजरःपितानोविभुर्विभावासुदक्षोअस्मे॥सुगार्हपत्याःस
मिषोदिदीह्यस्मद्रियक्सेमिमीहिश्रवोसी३वौ ३०॥आज्येपाणिनळंवदापयेत॥इळामुपान्हानवत्सर्वैर्मन्त्रै
रुपांशवः॥सर्वामाज्यंप्राश्नीयात्॥शंयुवाकोजपेन्नवा॥अध्वर्युर्वेदमादायपत्नीहस्तेप्रयच्छमानवाचयेत्॥अध्वर्यु
र्होतावा॥वेदोसिविन्तिरसिविदेयकर्मासिकरुणमसिक्रियासंसनिरसिसनिनासिसनेयंघृतवंतंकुलायिनंरायस्पो
षंसहस्रिणंवेदोददातुवाजिने॥वेदशिरसानाभिदेशमालभेत॥प्रजाकामावेत् प्रजाकामार्थेनाभिदेशेवेदशिरसो
आलभेत॥इत्यर्थः॥तन्मंत्रैः॥यंवहवउपजीवंतियोजनानामसद्दशी॥तंविदेयप्रजांविदेयकामायत्वा॥अथास्यायो
क्रंविस्रसेत्॥योक्रंविसर्जनीयं॥प्रत्वामुंचामिवरुणस्यपाशायेनत्वाबध्नात्सवितासुशेवः॥ऋतस्ययोनौसुकृत
स्यलोकेरिष्टांत्वासहपत्न्यादधामि॥योक्रंहिरण्मयंप्राग्यमूलंनिधायनदुपरिष्टात्वेदोदग्याणिनृणानिकारयेत्
तत्पुरस्ताद्गार्हपत्यहोत्रंहवण्यांजलेनपूरितंयोवेदतूष्णीमभिमर्शनेवाचयेत्॥पूर्णमसिपूर्णंमेभूयाःसुपूर्णमसिसुपूर्ण
मेभूयाःसदसिसन्मेभूयाःसर्वमसिसर्वंमेभूयाअक्षितिरसिमामेक्षेष्ठाः॥अथैनांपूर्णपात्रंस्रुजलप्रनिदिशेदुदक्षं
नदुक्षंतींवाचयति॥प्राच्यांदिशिदेवाऋत्विजोमार्जयंतां॥दक्षिणस्यांदिशिमासाःपितरोमार्जयंतां॥अपस्यूष्णा॥प्रती
च्यांदिशिगृहाःपशवोमार्जयंतां॥उदीच्यांदिश्यापओषधयोवनस्पतयोमार्जयंतां॥ऊर्ध्वायांदिशियज्ञःसंवत्सरः

४

प्रजापतिमार्जयंतां॥मार्जयंतामितिवा॥इतिपूर्वदिक्क्रमेण॥अथजघन्यांउपरिपत्न्यंजलौनिधाय॥योक्रस्याधस्तादा
त्मनश्चसव्यहस्तंनिधाय॥पूर्णपात्रंनिनयन्वाचयेत्॥माहंप्रजांपरासिचंयानःसयावरीस्थन॥समुद्रोवोनिनयानिस्वपा
थोअपीथ॥वेदबर्हिरसमुक्त्वातृणानीत्यूच्यते॥तानिदक्षिणहस्तेनाग्यंप्रदेशंगृहीत्वाअविधून्वन्विष्वक्सेनाकेपयन्॥
गार्हपत्यादारभ्यसव्यहस्तेनसंततंस्तृणंआहवनीयपर्यंतंगच्छति॥तंतुंतन्वन्नजसोभानुमन्विहिज्योतिष्मतःपथोरक्षधि
याकृतान्॥अनुत्वर्णंवयतांगुवामपोमनुर्भवजनयादैव्यंजनं॥इत्यास्तरणमंत्रोयेनगमनमंत्रः॥ततोमंत्रैस्तैस्तरणा
रंभः॥शेषंआहवनीयसमीपंनिधाय॥प्रायश्चित्तानिजुहुयात्॥अयाश्चाग्नेस्यनभिशस्तीश्चसत्यमित्वमयाअसि॥
अयासावयसाहतोयासन्हव्यमूहिषेयानोधेहिभेषजंस्वाहा॥अग्नयइदं०॥अनोदेवाभिःस्वाहा॥देवेभ्यइदं०॥इ
दंविष्णुर्विचक्रमेत्रेधास्वाहा॥विष्णवइदं॥भूःस्वाहा॥अग्नयइदं०॥भुवस्वा०॥वायवइदं०स्वस्वा०सूर्यायेदं०॥भूर्भुवस्व०
स्वाहा॥प्रजापतयइदं०॥ओंचमेस्वरश्चमेयज्ञेनकल्पंतामृक्चसामयजूंषिचमेयज्ञेनकल्पंतामृक्चसामयजूंषिमेयज्ञेन
कल्पंतांप्राणोमेयज्ञेनकल्पतामपानोमेयज्ञेनकल्पतांव्यानोमेयज्ञेनकल्पतामसुमेयज्ञेनकल्पतांचक्षुर्मेयज्ञेनकल्पतां
श्रोत्रंमेयज्ञेनकल्पतांमनोमेयज्ञेनकल्पतांवाङ्मेयज्ञेनकल्पतामात्मामेयज्ञेनकल्पतांयज्ञोयज्ञेनकल्पतांमहोमह
सास्वाहा॥यत्तेन्यूनंतस्मैतदुपयत्तेनिरिक्तंतस्मैतेनमः॥इतिसेस्रुजमुपोत्थायतीर्थंननिष्क्रम्यातियमः॥इतिसंतिष्ठते॥इतिदर्शपूर्णमासहोत्रप्रयोगसंपूर्णमित्यो३ ॥ ७ ॥
शाके१७४७ पार्थिवनामसंवत्सरेकार्तिकशुद्धअमावास्यांभृगुवासरेइदंपुस्तकसमाप्तं॥ ७॥ ७॥ ७॥ ७॥

97
1989



Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

इतिदर्शपौर्णमासहोत्रप्रयोगःसमाप्तिः